श्रीरङ्गलक्ष्मी–आदर्शसंस्कृतमहाविद्यालयः, वृन्दावनम्, मथुरा, उत्तरप्रदेशः

भारतीयभाषासमितिः, नवदेहली


इत्यनयोः संयुक्ततत्त्वावधाने

# दिनद्वयव्यापिनी कार्यशाला

# विषयः– सरलमानकसंस्कृतम्

**12 –13 फरवरी 2026**

## प्रधानसंरक्षकः



श्रीस्वामी गोवर्धनरङ्गाचार्यमहाराजः, श्रीरङ्गजी मन्दिरम्, वृन्दावनम्

## संरक्षकाः



आचार्यः श्रीनिवासवरखेडी
कुलपतिः– केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली



प्रो. आर् जी मुरलीकृष्णः
कुलसचिवः– केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली



प्रो. कुलदीपशर्मा
आदर्शप्रभारी– केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली



प्रो. रविशंकरनमेननः
अध्यक्षः प्रबन्धसमितिः– श्रीरङ्गलक्ष्मी–आदर्शसंस्कृतमहाविद्यालयः,वृन्दावनम्



शैक्षिकसमन्वयकः
डॉ.के. गिरधरावः
भारतीयभाषासमितिः, नवदेहली





प्राचार्यः
प्रो. पशुपतिनाथमिश्रः

## परामर्शकाः

डॉ. अनिलानन्दः (सहाचार्यः)
डॉ. रीतेशकुमारपाण्डेयः (सहाचार्यः)
डॉ. केशवप्रसादपौड्यालः (सहाचार्यः)
डॉ. विभा गोस्वामी (सहायकाचार्या)
डॉ. राजेशकुमारशुक्लः (सहायकाचार्यः)

## संयोजकः

डॉ. लक्ष्मीप्रसादगौतमः
9519120891

पञ्जीकरणसूत्रम्

9808858502, 8765926293

## महाविद्यालयः

भगवतः श्रीकृष्णस्य पावनक्रीडाभूमिश्रीधामवृन्दावनं भारतीयसंस्कृतेः मूलकेन्द्रस्थानं वर्तते। श्रुतिस्मृतिसिद्धविशिष्टाद्वैतदर्शनस्य प्रचारप्रसाराय नैयायिकप्रवरेण श्रीरङ्गदेशिकस्वामिना श्रीरङ्गमन्दिरस्य स्थापना श्रीधाम्नि वृन्दावने कृता। पश्चात् स्वामिवर्याणां गुणग्राहिशिष्याणां व्युत्पत्तिवादादिग्रन्थेष्वादर्शटीकाकर्तॄणां सुदर्शनाचार्यविदुषां सत्प्रयासेन च श्रीगोदारङ्गमन्नारभगवतः सान्निध्ये श्रीरङ्गलक्ष्मी-आदर्शसंस्कृतमहाविद्यालयस्य स्थापना अभूत्। महाविद्यालयेऽस्मिन् शास्त्री, आचार्यश्च कक्षाः सञ्चाल्यन्ते। ततः आरभ्य व्याकरणन्यायसाहित्यवेदान्तादिशास्त्राणां निरन्तररूपेण प्रचारप्रसारे महाविद्यालयोऽयं बद्धपरिकरो वर्तते। भारतसर्वकारस्य आदर्शयोजनायां समायोजनेन, केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली इत्यस्य सम्बन्धनप्राप्ते चास्य महाविद्यालयस्य गौरवं वरीवर्ती। इदानीं नूतनशिक्षानीतिमादाय पाठ्यक्रमाणां सञ्चालनेन आङ्लसंगणकशारीरिकशिक्षाद्याधुनिकविषयाणां प्रवेशाच्च छात्राणामपि आकर्षणं वर्धमानं दृश्यते। केन्द्रीयसंस्कृतविश्वविद्यालयेन समायोजितविविधकार्यक्रमेषु चास्य महाविद्यालस्य छात्राणां प्रदर्शनं निश्चयेन प्रशंसनीयं वर्तते। एवमेव विविधशास्त्रीयस्पर्धाष्वपि छात्राणां प्रदर्शनं निश्चयेन महाविद्यालयस्यास्य उत्तमपठनपाठनस्य गौरवमासादयति। ब्रजमण्डले स्थापितस्य प्राच्यविद्याकेन्द्रस्यास्य संस्कृतसेवा अतीव गौरवगर्वितेति नास्ति शंकावसरः।

## सरलमानकसंस्कृतम्

संस्कृतं भारतीयज्ञानपरम्पराया मूलाधारो वर्तते। अस्यामेव भाषायां वेदपुराणोपनिषद्धर्मशास्त्रादिवाङ्मयं व्याकरणदर्शनसाहित्यादिशास्त्राणाञ्च गूढतत्त्वं निहितं वर्तते। उक्तञ्च- भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा। भारतीयसंस्कृतेः प्रचारप्रसाराय संस्कृतस्य ज्ञानं निश्चयेनावश्यकं भवति। संस्कृतमेव एका भाषा अस्ति या इतर भाषामाध्यमेन पाठ्यते अवगम्यते च। तेन छात्रेषु विषयबोधनात्प्राग् अनुवादस्यापि भारः आवहति। इयं हि प्रक्रिया नैव आधुनिकशिक्षणानुकूला। अत एव अस्याः समस्याया दूरीकरणाय केन्द्रीयसंस्कृतविश्वविद्यालय-नवदेहलीद्वारा शिक्षणासंस्थासु अध्ययनाध्यापने व्यवहारे वा संस्कृतमयं वातावरणं कथं स्याद्? का च तत्र समस्या? तन्निराकरणोपायश्च कः? इति सर्वं विचार्य 'सरलमानकसंस्कृत्' इति ग्रन्थस्य निर्माणं कृतम् । तत्तच्छास्त्रेषु प्रतिष्ठितानां विदुषां योगदानेन चास्य ग्रन्थस्य महत्त्वं वरीवर्ती। अत एव शास्त्रीप्रथमसत्रार्द्धे प्राठ्यक्रमे ग्रन्थस्यास्य समावेशं कृत्वा संस्कृताध्ययनाध्यापने कश्चन नूतनः प्रयासो विहितः। सन्धिसमासकारकादिव्याकरणगतसिद्धन्तानां रक्षणं कृत्वैव अन्यभाषावत् सरलतया संस्कृते व्यवहारः कर्तुं शक्यत इति ग्रन्थस्यास्य ध्येयमस्ति। अत एव सरलमानकग्रन्थमादाय इयं कार्यशाला आयोजिता वर्तते। अपि च शिक्षामन्त्रालयाधीनभारतीयभाषासमितेः वित्तीयसाहाय्येन इयं कार्यशालया आयोज्यमानास्ति। तत्र सर्वेषामपि संस्कृतसेवापरायणानां छात्राणां, शोधार्थिनां, शिक्षकाणाञ्च विशिष्टं ज्ञानं भवेदिति।

निर्देशाः-

1. कार्यशालायां पञ्जीकरणकृतवतां प्रतिभागीनां भौतिकोपस्थितिरनिवार्या।
2. प्रतिसत्रमुपस्थितेभ्यः प्रतिभागिभ्यः एव प्रमाणपत्रं प्रदास्यते
3. कार्यशालायां प्रतिभागिभ्यः अतिरिक्तं दायित्वमपि दातुं शक्यते।
4. पञ्जीकृतेभ्यः प्रतिभागिभ्यः एव दिवाभोजनं चायपानादिकश्च कल्प्यते।
5. यात्राव्यय-आवासव्यवस्था च प्रतिभागिभ्यः स्वेनैव वोढव्या।